मूहोषापेतिवाच्यं॥अर्थेतत्संदेहेनतादृशतात्पर्यनिश्चयासंभवादिति॥रहस्यविदस्त्वत्रेदमुपदि
शंति॥स्वनित्याहृद्येतइत्यस्यएकादशाधिकशतसंख्यजपादृद्येतइत्यर्थः एकसंध्यासंख्यामुखेनप्रति
पाद्य २ पदेनसंध्यात्रयेमिलितसंख्यामिधीयतेतथाचत्रयस्त्रिंशदधिकत्रिशतसंख्यालाभात्द्विशिष्ट त्रि
सहस्रसंख्यजपोमूलस्वरसिद्धःप्रत्याह्निकःसंपन्नः स्वनित्यपदादेकादशाधिकशतसंख्यालाभः स्वपुष्या
पितइतिचेतन्नसकारवकारान्भ्यामेकादशसंख्यायाः नित्यपदाच्चपूर्वोक्तजघन्यपक्षीयशतसंख्यायालाभ
संभवादिति॥वस्तुतस्तुअत्रपूर्णायामेवप्रारंभः वसंतकालेग्रीष्मेवापूर्णिमारभ्यलाभयेदितिवक्ष्यमाणप
टलोक्तेः समाप्तिरपिपूर्णिमायामेव॥पूर्णांतिमित्यस्यप्रकृतमूलएवदर्शनात्॥इदंत्वधिकंयत्तिथिवृद्धेक
त्रिंशद्दिनात्मकोमासोत्रग्राह्यइतितथाच पूर्णिमामारभ्यपूर्णिमापर्यंतेयदाह्येकत्रिंशद्दिनानिभवंतितदा
पुरश्चरणमिदमाचरणीयमितिभगवदभिप्रेतमितिनिश्चीयते॥तत्र पंचविंशत्युत्तरेकत्रिसहस्रसंख्याप्र
त्याह्निकजपेनलक्षसंख्यापूर्तिर्भवतीतिनसंख्यावैषम्यं॥स्वनित्यपदेनप्रातःसायंसंध्ययोर्नित्यजपसंख्या

२ त्रिंशद्दिनात्मकपक्षे [illegible] २ [illegible]धिक
२ पक्षाच्च [illegible]

१२३ नाप्र न्त्रितपोरपेक्षपा
तत्वानां ॰ तेरात्तपा २

सुदर्शन

याविवक्षितया पंचविंशतिसंख्यालाभे संभवेनन पुरश्चरणसंख्यायामुसा नापातत्व कृतेवैषम्ये गो
य नार्थं [redacted] चमध्यागतो पिमाध्याह्निकनित्यो शस्त्यक्त इति ॥१३॥ तत्किमेकलक्षमेव पुरश्चरणसंख्योने
त्याह एवमित्यादिना एवं पूर्वोक्ते ति कर्तव्यता समानेति कर्तव्यताकं लक्षत्रयमिति अक्षराणां तु सं
ख्यये त्युत्तरश्लोकस्थमत्र संबध्यते एकादिनवांताक्षरकमंत्राणां प्रत्यक्षरं लक्षत्रयं दशादिविंशांता
क्षरकाणां प्रत्यक्षरमेकैकलक्षं एकविंशादि [redacted] केवलं लक्षमेव जपः पुरश्चरणे मतमिति वि
शेषानुशासने भवतीत्यर्थः सेषां संख्या संस्त्युगपरा युगांतरेषु क्रमेणाद्वैगुण्यं त्रैगुण्यं चातुर्गुण्यं
चाव धेयमित्याह प्रथम इत्यादिना ॥१४॥ तात्रीयेति पद्यपि संपूर्णमंत्राक्षरसंख्येव लक्षादि जप सं
ख्यानिमित्तेन परिकल्पितत्वेऽक्षरसंख्येति तात्रीयेति व्यर्थे विपरीतार्थप्रत्यापकेचेतीत थापि तत्रीये
ख्येऽक्षरसंख्यागणनेनापि संपूर्णमंत्रवारसंख्यागणनफलसंभवात् किमर्थं संपूर्णमंत्राणां गणनो
नं कर्तव्यमित्यपि प्रेत्यतथ्योक्तिः ॥ एतेच वर्णक्रमनावृत्ता एव गणनीया न पुनरावृत्ताः अक्षराणां तु
संख्ययालक्षत्रयमित्युक्तिसामर्थ्यात्तपदिसर्वाक्षराणि समुपादीयेरंस्तदाक्षराणां पंचदशसंख्यानो
सत्यात्तत्प्रत्यक्षरं लक्षत्रये एकलक्षेवा एकचिंता तिरितिवक्ष्यमाणाद्वैनुपपन्ने स्यात् पञ्चमायाचीजा रामः

कारकदीपकाणि

१२३

साधुक्ति

३ यद्यपि प्रथमादिखंडोपासनेषुक्तेष्टसिद्धौ तात्रीयेति पर्यंतानुधावनमयुक्तं तथापि स्त्रीवोदितलीलया साहाय्यमाहुपयोगित्वात् तत्पाठिः २

तिमेवं त्वत्रेप २

क्षराणां प्रथमपादेनेत्तदा चतुर्विंशतिसंख्याक्षराणां स्यात्. अथैकद्वेव मात्राक्षराणां गणनात् द्वाषो
डशसंख्यत्वमक्षराणां स्यात्. अनाहतत्वस्वीकारे तु संपूर्णानामपि विचित्राणामनाहताः सर्वे वर्णाः
संतीनाधिक्यः ॥ अथ यो वर्णो द्वित्रिचतुरादिसंख्यायोक्तः स किंनैव गणनीयः । किं वा सकृदेव गणनी
य इति चेत् मैवं सम्प्रति अवगणादात् तु वर्णानामपि सकृदुपादाने सूच्यते. अन्यथा षड्वत्तादृशाः स्युः
कोपि वा न तादृशः स्यात् सर्वेषामप्याहतत्वात् ॥ ७५ ॥ तेन अनाहतवर्णानां प्रतिव्यक्ति लक्षत्रयसंख्या
यामुखश्चरराजपयक्षमवलं स्वसत्वगे एकविंशतिसंख्यया मुख्यश्चरराजपयोयतउक्तस्स्यात् अन्येषु त्रे
तादिषु संख्यावृद्धिः द्विगुण्यादिविशिष्टासंख्या ॥ अस्मिन् पुरश्चरणे अत्यावश्यकतया प्रसक्तं वि
घ्नं दर्शयति वनितेत्यादिना । वनितया कृतो यो योगः कुचाद्यंगदर्शनहास्यादिभिः कृतो मनःक्षोभः का
मप्रादुर्भावस्तत्कृतस्त्रीसंभोगेन यदि विघ्नो न स्यात् संभोगाभिन्न एव विघ्न इति तथा चेत् हि घ्नाभाव
विशिष्टपुरश्चरणमेव विघ्नासाधकं न तु विघ्नविशिष्टमिति फलितार्थः ॥ वनिताक्षोभ इत्यनेन
केचलेपु सवाययारिहार्थ कर्तुं कालावच्छिन्नस्त्रीसंभोगस्तन विघ्नतामापद्यते इत्युक्तं अत एव षोडश
तुर्निषिद्धानां तासु पुमासु संधिषु ब्रह्मचार्येवेति स्मृतिषु तादृशर्तौ पुंसमोक्तृरपि ब्रह्मचारि

सुदर्शन

त्वमनुज्ञातंभोगसामान्याभावविवक्षणोवनिताभोगनइत्येवब्रूयात्॰ इदंतुबोध्यं॰ निश्चितवंध्याभावभा
जांवनितानाम्‌ऋतुकालेपिसंभोगोनाभ्यनुज्ञायते॰ ऋतावुपेयात्तेचाभार्यामित्यथामूरागाहाभवेदितिवृद्ध
तागाभिधानाभावप्रसक्तमूलहेतुताधिगमनमेववनितानधिगमनप्रयोजकतयाकथितंतत्त्ववंध्यानधि
गमेपिनप्रसज्यतइतितत्राप्यृतु॰वृत्तिभंगोनिष्ठुसूहएव॰ एवमेकोकषोडशादिनात्मकर्तुकालेसकृ
त्सकृदेवागमनमनुज्ञायतेनद्विरभ्यासःकाकथात्र्यादिगमनानां॰ सकृद्गमनादेवगर्भस्यसिद्धेरित
रगमनानामेतद्वचनेनप्रतिषेधितत्वात् वक्ष्यमाणंमैथुनपदंचोक्तार्थतात्पर्यकमेवेतिनततोपिऋतु
कालावच्छिन्नसंभोगप्रतिषेधप्राप्तिप्रत्याशा॰ नचैवंपुनस्तदुपादानंव्यर्थमितिवाच्यं इदानींविधु
रूपतयातदुक्तेः॰ अग्रेतुसर्ववेदीवत्पुंमध्येगानमितिपौनरुक्त्यासप्रक्तेनचदेगृहस्थेतरपरंपूर्वस्यै
गोभविष्यति॰ गृहस्थधर्मेषुमैथुनस्यावश्यकर्तव्यत्वेनोक्ततयास्ववदातद्वर्जनस्यासंभवादिति
वाच्यंतत्रापिनिंदितपदश्रवणेनतदर्थस्यमैथुनेष्वन्वयविवक्षणात्॰ रजस्वलावस्थामैथुनंदिवामैथुनं॰
पर्वव्रतश्राद्धादिनिमैथुनं॰ गर्भिणीमैथुनं॰ वृतस्थामैथुनंगोपानमैथुनं॰ जलमैथुनं॰ तैलाभ्यंगाप्लुतिमै
थुनानामेवस्वभार्याभिःसहनिंदितयातद्वितरपरतयागृहस्थधर्मवचनानांचारितार्थ्यात्॰ परमैथु राम॰

125

नेपूर्वोक्तविघ्नरूपमितिनिषिद्धकर्मोक्तं तनुयोनरक्तायपुसन्नेयैवदूषितमित्यलंप्रासंगिकविचारेण ॥ ७६ ॥ ता
स्तु पूर्वोक्तपुरश्चरणजपसंख्यासु पूर्णासु निर्विघ्नं परिपूर्णतामागतासु सतीषु संप्राप्य गुरुदैवतयोरग्रे
स्वानुष्ठितपुरश्चरणस्याच्छिद्रतां प्रकर्षेण पुनः पुनः प्रणामादिपूर्वकमर्थयित्वा क्रमेण गुरूपदिष्टनिस
कर्मप्रकारं श्राययेत् अहरहरनुतिष्ठेत् तस्मिन् पुरश्चरणकाले सर्वदा सर्वस्मिन्नपि काले साधकस्य वर्ज्य
नीयं एतावता सर्वदा शास्त्रोक्तकर्मानुष्ठानं शास्त्रप्रतिषिद्धकर्मपरावर्तनानामेवोपासनायामधिकारो न
सर्वेषामिति ध्वनितं ॥ ७७ ॥ चिन्ताजपेत्रपूर्वस्यममराजन्मूराणुपिशुनाः कार्पण्यं शोकरिष्येतीत्येवमाद्याः शो
कः पुत्रकलत्रादिवियोगप्रभवं दुःखं आलापो जपसमये परैः सह वार्त्ताकरणं ॥ देशांतरपरिभ्रमः पुरश्च
रार्थं परिगृहीतदेशाद्बहिर्देशगमनं ॥ एतावता तत्रांतरोक्तदिशा पुरश्चरणार्थं भूमिग्रहणं कर्त्तव्यमिति सू
चितं अहरहर्नियतसंख्यं पुरश्चरणजपानुष्ठानवतो दूरदेशयात्राया अप्रसक्तत्वात्तन्निषेधपरत्वेन तन्नैते
दशानि संभवति द्वितीयोक्तानामेवां वर्ज्यानीत्येतस्य दूरसूचितत्वजयेदिति त्रिपादेन व्याहृतेनाध्वपः ॥
७८ ॥ तत्रास्मिन्पुरश्चरणानुष्ठानदिनेषु वर्ज्यानि प्रतिषिद्धानि कानिचित् पूर्वमुक्तान्येव कानिचित्त्व
न्यानि स्मरणु ॥ न केवल समेतानि फलोत्पत्तिप्रतिबंधकराण्येव किन्तु सर्वत्र सर्वत्र सर्वदेशेषु देश
त

सुदर्शन स्व॰ सर्वेषां नतृणासक्तानामेव ॥ सर्वदा सर्वेष्वपि कालेषु नत्वनुष्ठानसमय एव ॥ नाशकानि नाशकानि
॥७८॥ परेत्यादि योऽतिक्षेत्रगृहस्त्री ति त्रिके प्रत्येकमन्वेति ॥ अत्र परत्वेच स्वनिरूपितस्वत्वशून्यत्वेन
तु परकीयस्वत्वशालित्वं तेनान्योद्देशेनोत्सृष्टक्षेत्रादेः प्रतिग्रहीतृत्वेनाभिप्रेतेनास्वीकृतस्य किंचि
न्निरूपितस्यापि स्वत्वस्यानाश्रयस्य वांछासु प्रसक्तायामनापत्तिः साधारणस्त्रीभूतानां वेश्यानामुपास
नापत्तिश्चेति पुरस्कृतस्वस्वत्वविरहस्य परस्वत्वानालिंगितेपि तत्र सत्वेन स्वोपादानयोग्यत्वाभावात् क्षे
त्रादेः स्वकुशकाशादिकं तु परिग्रहणमात्रेणाप्य स्वत्वकं परकीयस्वत्वविरहि च कथं नोपादातुमुचि
तं स्यादिति परेषां स्त्रीणां च निंदितानि स्त्रीपुरोषेपुहारत्वनयोजयेत॰ दुष्टास्वपि समुचितरोषप्रह
णस्वपि॰ भगवत्याजगन्मूलत्वेपि चात्तिकश्चिन्मुमयेक्षया स्त्रीषु कस्याश्चिद्विशेषइति तासां पूजाविधि॰
निंदनरोषप्रहारप्रतिषेधाभ्यामवगम्यते॰ तासां द्वावगास्यतत्पूजाकालप्रदर्शनीयमुद्रा संस्थायस्यासंभवे
न प्रीतिविशेषो भवतीति ॥ चनिश्चीयते इति ॥८०॥ सिद्धि[illegible]विहानिजातसिद्धिकानां पुरुषोलक्षणानि धि२
वासनाकथने वासनानां कथने यत्रे त्येवंभूते पंचत्रिंशपटले॰ उक्तानीति व्याख्यानतत्त्वे॰ इत्याराकूल्य
स्य विहानिस्व प्रतिविधानुकूल्यस्य सूचकानि लक्षणानि ॥८१॥ पोतेषु नौकासु स्त्रीसमुदायेन सह हसि रा०म०

=पथं=तावः ।=प्रा०ता भि न्याः सिद्धेरेतान्येव ॥ च ल० ला ॥ [illegible] ॥ पत्पर दे त्रादि कां घ्न प्ववि र ह॰ द र निं दा नि र क्तिः
साप राधा तां नि ऊ नार्या पा न पि क्रो धा न नु वर्तकं का

सनमेकेचिदूं॥ निशीत्सनेन दिवास्वप्नो निरर्थक इति स्मृतिर्वि॥ ८२॥ नृत्तगीतयोर्दर्शनमिति संबंधः॥
८३॥ निद्या निद्रा निष्ठ सूचकानि- विघ्नस्यासिद्धिप्रतिबंधस्य सूचकानि का निचिह्नभाविनोनर्थ
स्य प्रकारांतरसंपन्नसंपन्नाशपुत्रकलत्रनाशादेरसूचकानि जनकानि स्वप्नापशकुनादेर
नर्थजनकत्वेमानाभावात्तस्मात एव संहितायां सिद्धिमसिद्धिं च जानीयादिति ज्ञानमात्रं तत्फलमु
पदिष्टं॥ ८४॥ परनारीभिरित्यत्र बहुत्वमविवक्षितं॥ अत एव मैथुनमित्येकवचने इदमप्यविव
क्षितं परस्त्रीसंभोग एकोनेको वा स्वप्ने जातो न श्रीसूचयतीत्येतावानेवार्थोत्र विवक्षितः॥ इन्द्रियच्य
वने चक्षुरादीनां घ्राणाहीनां स्वस्वस्थानाच्च्युतिः तथा पदे सगरहरो प्रयीजकत पेंद्रियतत्स्थानांद
तानां च्यवनसंग्राहकं॥ ८५॥ स्वप्नान्तका जाग्रदवस्थास्वनर्थचिह्नान्याह गुरावित्यादिना गुरो हित
कारणो च प्रवृत्तिः अर्थसंपत्तिः पूजाद्युपयोगिवृत्त्याणां कृते य्यर्जनप्रयत्ने लाभो वः स्वविघ्नवातानां व्याधि
संबंध एव द्वितीययादार्थः स्वसाध्यनीयमंत्रतोन्यमंत्रस्यार्चने उपासनविषयकः फलावशेषमाव निश्च
पत्रप्रस्तकानि सा पाठार्चने उपासने विघ्नो भवति॥ ८६॥ नन्वयं विघ्नः शुभवशोष एव किं न स्यात्तत्र हि
सर्वोपि विघ्नो निष्ठः अनिष्टकार्यस्वस्त्येषु कार्यप्रवृत्तानां विघ्नस्याभ्युदयस्येव कलादिसत्रो हने

णाग्यिति॥ वहुभिः पुराणैः षोडशमहादानाश्वमेधादिमहायज्ञ-चान्द्रायणप्राजापत्यादिनानाना
कृच्छ्र-वाराणसीप्रयागादिमहातीर्थसेवादिप्रभवैर्नानाधर्मैः त्तान्यपिनैकजन्मोपार्जितानि-किं
तु नानाजन्मसंचितानि स्वस्वजन्यादृष्टद्वारा एकत्र मिलितानि प्रभाववैलक्षण्यापन्नानि सापराधान्यैव चैने
पूर्वोक्तिलक्षणाकथ्यापाः स्थैर्यमनुत्तरोत्तरकालानुवृत्तिसाधयेतितथा चैवंविधदुर्लभतरश्रद्धा

विघ्नः सकलानर्थकारी भवतीति कोन्योस्मादधिको हेतुरिति सर्वार्थेवे तन्निवारणोपतित्तव्यमिति
फलितार्थः तथा संप्रदायः शुद्धिरपि पूर्वोक्तपुण्यपसंचयादेव भवति संप्रदायपदनिरुक्तिस्तु का
प्राचिनैः समासमभ्यकृत्यमुदितं प्रेरणोत्कर्षश्च-दायतः वस्तुतेनोत्तमाविधासामकनः संप्रदायपद
तितथा च सम्प्रकप्रकृष्टं वस्तु चिद्याप्रदाभिधेयं संप्रदायपदवाच्यं तस्याः शुद्धिर्मैत्रिति फलोनुव
तारूपा-श्रुद्धगुरूपैरपरोपलब्धा भवति सा च पुण्यपात्रिशयैकेत्तिरहस्यार्थः॥ ७९॥ ॥ कूर्मचक्रस्य
पूजाजपप्रसंगेन स्मरतियथमाकूटस्थसाधकानामात्रुप्रतयानुपेक्षणीयस्य निरूपणाभ्युग्रधासि
कू प्रायेन्वयव्यतिरेकाभ्यां पूजाजपादिप्रयोज्यफलसिद्धौ सहकारित्वमुपवर्णयति कूर्मेत्यादिना॰
२ यः कूर्मस्यवक्ष्यमाणप्रकारेणाषडंगानामवस्थानं नेत्वा तु जपपूजादिके करोतितस्यासिद्धिंस्तु राम॰

त्रैतेत्रांतस्योक्तानिफलानिनभवंति॰ एतेनज्ञात्वाकृतेस्तूपपूजाजपादिभिःफलंभवतीत्यन्वयोपिदर्शितः॥ अ
पमाशयः॥ योहिकूर्मस्यकिमंगंकुत्रास्तीतिनजानातिसोयंयथेष्टंनिषिद्धेपिस्थित्वापूजादिकरिष्य
तीतिफलंनप्राप्स्यतितेनस्थानकृतानुष्ठानप्रभवाभिष्टफलंचप्राप्स्यतीति॰ यस्तुकूर्माच्छुभएवस्थानेपूजा
द्यनुष्ठानानितेषुतिष्ठतुनायमनिष्ठोपदेशः॥ अन्यथा अज्ञात्वानाशंवक्ष्यमाणांततत्तद्दृष्टं॥ ८८॥ अविरंजपपूजा
होमतर्पणादिकेसर्वेषामपिदेवतानांसर्वमपिकर्म्म॥ सकूर्मः॥ चतुर्विधः॥ लोकेसर्वस्मिन्नपिभूमंडलेएक
एवतदंगज्ञानप्रकारोननुदेशादिभेदभिन्नः॥ द्वितीयेइति॥ सकलकर्मणांफलदायिज्ञानकर्तव्यप्रियभूत
मिदंवस्तुप्रियभूतायैवोपदेश्यमितिध्वनयितुंतथासंबुद्धिः॥ ८९॥ परकूर्मोदिशिकूर्मोग्रामकूर्मोगृहकूर्मो
श्चेतिचतुर्विधः॥ ९०॥ परकूर्मवक्ष्यमाणाप्रकाराभावात्तमपहायकूर्मत्रिकेषडंगज्ञानप्रकारमुपदिशति
देशमित्यादिना॰ वास्तुपदमप्रसिद्धनामकगृहविशेषपरमेव॥ अतश्चवास्तुगृहज्ञानरूपेत्वित्यनुपदमेवच
क्ष्यतिनातश्चतुर्विधत्वव्याघातः॥ नचदेशादिवास्त्वंतकूर्मभेदेचचातुर्विध्यंसूत्रयापादेअतएवदेशादिच
तुष्टांनिवभागादिकल्पनमपिसोरस्यभावहतीतिवाच्यं॥ प्रथमस्तुपरःकूर्मइत्युक्तमूलविरोधापत्तेः॥ अ
वेतीति॥ अयंहिनिर्गलितार्थः॥ देशादीनांत्रयाणामेकैकस्मिन्प्राकुप्रत्यकूदक्षिणोदकूपरस्परंसंभिन्न

७०१

तुनुपरकोष्ठेपादर संरव्या स्वप मुक्ता पूर्वतुने तिवैपत्तो
नोचित मिति वेन्नो स तानि कादि मांता नि पूर्वादि पश्चिमां
तनितु तया पंचकपंचे तत्पर्व स्पार्थिक ग्रामे: स ता निपं च संरव्या

सुदर्शन 127

समांतरालरेखाचतुष्टयेन नवकोष्ठानि संपाद्य· तेषु पूर्वदिक्कोष्ठमारभ्य पश्चिमदिक्कोष्ठांतं पंचकोष्ठेषु
कादिमांतपंचवर्गान् उपलिखेत·॥ प्रतिकोष्ठं वर्गलेखविधेषु प्रथम प्रथमे स्थाने प्रथमवर्णं लिखित्वा पूर्वा
दिचतुर्दिक्षु क्रमेण द्वितीयादिपंचमांतवर्णानालिखेदिति प्रकारेणेति प्रामाणिकसरणिः॥ ततो वा
यव्यकोष्ठे पकारादिचतुष्कं तत उत्तरकोणे शादिचतुष्कं लिखित्वोर्द्धरिते लक्षे त्मक्षाद्वयमीशानकोष्ठे
लिखित्वा·॥ सर्वमध्यकोष्ठे पूर्वादीशानांतासु दिक्षु द्विद्विक्रमेण स्वरान्लिखेदिति॥ ९१॥ ९२॥ कि
मस्य लिखने स्य फलमित्यत्राह नामाद्यवर्णमित्यादि। देशादीनां नाम्नां मध्ये यस्यैव कूर्मस्य विचारश्चिकी
र्षितस्तस्य देशस्य नाम्नः प्रथमाक्षरं यत्र कोष्ठे तिष्ठति तत्कोष्ठस्थानं तत् कूर्मस्य मुखं तत्कोष्ठपार्श्वभागयोः
स्थितं कोष्ठद्वयं पाणिकरद्वयं तदनंतरं कुक्षपतः स्थितं कोष्ठद्वयं कुक्षिद्वयं तदनंतरं कोष्ठद्वयं पादद्वयं तद
नंतरमेकं कोष्ठं पुच्छस्वरूपं मध्यस्थकोष्ठं पृष्ठरूपमित्येवं षडंगवान् सर्वोपि कूर्मो भवतीति सार्द्धक
श्लोकपर्यवसितार्थः॥ ९३॥ एतज्ज्ञानस्यापि किं फलं तत्राह मुखं देशादिनाम्मुखे कूर्ममुखे स्थितत्वादनु
ष्ठितो जपादिः सर्वेषां स्वाभीष्टानामर्थानां सिद्धिर्यस्मादित्येवंभूतो भवति· करयोरन्यतरत्र स्थिते वा
कृतस्तु जपादिस्त्वल्पसिद्धिकारः॥ ९४॥ कुक्षौ· कुक्षिद्वयस्यान्यतरत्रा च स्थाने जपाद्यर्थमनुष्ठितेनित्य राम०

मुक्ते दिपि ३ कुक्षौ स्वल्पसिद्धिः पादे गमनाद्य

नैष्फल्यं स्यात्तन्न कदापि फलप्राप्त्याशा पादद्वयोरन्यतरत्र स्थितत्वानुष्ठितो जपादिः सर्वेषां धनगृहीतृ निकरो
भवति। एवं स्थितत्वानुष्ठितो जपादिः सर्वेषामर्थानां साधनं सिद्धिर्यस्मादेवं भूतो भवति॥ द्याति तस्मा
दित्यादि पस्मादंगानि विद्धि षट्कराणि कानि चित्त्वनि षट्कराणि दर्शितानि तस्मात्तत्तत्कूर्मांगस्या
कूनि ३ धूर्द्धष्टसाधकं। चित्तापविशेषेणाज्ञात्वा विशेषज्ञानत्वं च ज्ञानफलीभूतं तथानुष्ठानपूर्वकत्वरूपं स
र्वसमीरितं स्वतंत्रे तंत्रोत्तरे च प्रोक्तं जपपूजाहोमादिकं। देशकूर्मादौ कं चिद्विशेषमाह व्यंजनमि
त्यादिना पूर्वोक्ते देशकूर्मचक्रे देशनामप्रथमाक्षरं कादिपंचत्रिंशदन्यतमव्यंजनरूपं पत्रकोष्ठे तिष्ठ
ति तस्य मुखत्वं परिकल्प्य तदानुगुण्येनांगानां परिकल्पनपूर्वोक्तरीत्या विहितो जपादिकार्यः। इह कू १८५
र्मे तु गृहस्वाम्यभिधानप्रथमाक्षरसंबद्धस्वरमेव पत्रकोष्ठे पश्यति कोष्ठस्यैव मुखत्वं कल्पयित्वा शेषां
गानां नादिकपूर्ववत्कार्यं॥१९८॥ ग्रामनगरादिकूर्मचक्रे तु पूर्वोक्ते पत्रनामधेयप्रथमाक्षरव्यंजनरू
पं पत्रवनामाद्याक्षरसंबद्धस्वररूपं च तिष्ठति तदुभयं मुखमिलेव च ध्यं तदन्यतरानुगुण्येन शेषांग
कल्पनं भवति ग्रामादिकूर्मचक्रे द्विविधांगकल्पना प्रामाणिकी भवति। तिगु विच्छेपान्यतरः पक्षः
स्वपमाश्रयणीय इति फलितार्थः॥ इदं तु बोध्यं देशग्रामस्वगृहकूर्माणां त्रयाणां चक्रेषु पन्मुखाद्य

सुदर्शन

नुगुणस्थानत्वेन पततितदेवस्थानेजयाद्यर्थमनुसरणीयमिति [redacted] देशादि
कूर्मस्य नामाद्यक्षरे केवलत्वेरस्वपेतत्को घ्र दिगातेव्याह्यको मुखत्वेनपरिकल्प्य शेषांगकल्पनं पू
नु र्ववत्कारणीयं न हृयं यजनेस्वरखोहं लेख्याइ समर्थः ॥ पूर्वमुखः पूर्वाभिमुखः ॥ पंचाशत्कोटियोजना
यामायाः पृथिव्याः धारकः परः कूर्मोस्ति· तत्र नकेपिवर्णाले ख्वनीयाइ तिनन्धुनियतावस्थिति
कस्यास्य कूर्मस्यात्र प्रदर्शने किमर्थं स्वयमपि पूर्वाभिमुखो जपादिकारी कदापि पश्चिमदिकस्थि
तमुखस्थानभविष्यतीति ज्ञापनार्थमितिचेत· एवं तर्हि उत्तरेशानपश्चिमाद्याभिमुख्येनोक्तते
128 त्रांतरप्रयोगाणां विरोधापत्तेरिति चेत्तमेवं एतेन कूर्मस्थितिनियमवचनेन पूर्वाभिमुख्यनियम
मेवक्तेपि क्वचिन्निरवकाशविशेषवचनैर्वाधोपिस्यादिति विरहात ॥ २७ ॥ कूर्मचक्रप्रकारमुमसं
हरति एवमित्यादिना सर्वचक्राणांतु प्रस्तुतानामेव· ॥ सर्वतः पूजनयजनहवनादिभिः सर्वप्रकारैः
नत्वेकतरेण ॥ सदा सर्वकालमनुसरणीयो यं प्रकारः न तु कदाचिद्बाधोपि ॥ २८ ॥ अथासनानामका
नां वास्तनो नामकल्पनाप्रकारमुपदिशति [illegible] स्यादिनात्र्यापामेनदेर्घ्येण ॥ विस्तारेसे
चक्र्यगुणापिता ॥ तद्भूहस्यपदेर्घ्यमानंतेन द्भृहविस्तारमानेगुणापित्वासंपन्नसंख्यामष्ट भि रामः

द्वि २

विभज्य शेषांकेन अकचटतपयशात्मकाष्टवर्गाद्युत्तमवर्णादिमाक्षरं ज्ञात्वा तदेवाक्षरं तद्रूपस्य नामा
द्यक्षरं जानीयादिति ॥ आद्यं वर्गत्रिक चाद्यन्युत्तमवर्गे ॥ नौ नामाद्यं तदेव वर्गाक्षरं प्रथमाक्ष
रमेव नाम प्रथमाक्षरं कुर्यादिति यावत ॥ ८९ ॥ अज्ञातरूपेषि तेन ज्ञाते रूपे नाम स्वरूपं येषां ते
ष्वित्यर्थः ॥ नामतः प्रसिद्धेपदार्थात्त स्वरूपं तत्र तन्नामतः कुर्भ च क्रि क्विचारो भवति न तन्न्कारीत्या नामक
स्यनाप्रयासः ॥ अप्रसिद्धनामकेषु गृहेषु नामकस्यनार्थं पुकारांतरमिवोगकस्यनं तत्फलमपि च पुका
रांतरेणेव किं भविष्यतीत्यत्रहितत्रिदसादि ॥ तत्र स्थाने पादयुच्छादिषु ॥ अन्यथान्यस्थाने पु ५
कुक्षिरूपेभून्यतानिष्फलता ॥ इतोन्यत्र स्थाने पूर्ववच्छुभमेवेति भावः ॥ ९० ॥ व्योमेत्यादिव्याख्या
तप्राये साक्षाच्छ्रीयतिकार्त्तवीर्यकरूराणा कस्यद्दुमोद्यस्फले विद्धस्त्रेमनिधिप्रसिद्ध त्रिषः ॥ रामप्रि
यास्मभवे अन्वर्थाभिधतंत्रराजविषमग्रोकार्थसंदर्शनान्वर्थाख्यान सुदर्शनेत्रय लोपूर्वोगतः पच ८३
मः ॥ श्रीकार्त्तवीर्यार्जुनापनमः ॥ स्वतेत्रेतेत्रे क्वाकलितगुरुमार्गघ्रच मसान र्वत्तेद्दु बुद्धेर्विषय
वपले यत्र विषणात्तथापी तो ग्रंथो यदि भवति भव्यो यदमेल प्रभावात्सोयं कोपि च विजयते हे हे यपतिः

॥ ॥नित्यस्येव नैमित्तिकस्यापि कर्मणः प्रत्यवायपरिहारप्रयोजकानुष्ठानकत्वस्य तुल्यतयानित्यं कर्म निरूप्या
वसरप्राप्तं नैमित्तिकं कर्मापि निरूप्याग्रे काम्यकर्म निरूपयिष्यति॥ तत्र काम्यमेव कर्म सकलका
म्यार्थसाधकतया सर्वेषामपि शुश्रूषाविषयतया कुतः पूर्वं न निरूप्यत इत्येकाशंका॥ नित्यकर्म
णाम करणे प्रत्यवायस्य श्रुतिस्मृत्यादिसकलशास्त्रसिद्धतया स्यात्तो नाम तदनुष्ठानं तन्निरूपणे नै
मित्तिकस्य तत्त्वे प्रमाणाभाव इति द्वितीयाशंका॥ आस्तां वा नैमित्तिकमप्यावश्यकं तथापि काम्य
कर्म ततः पूर्वं निरूप्यत इत्येकाशंका॥ नित्यकाशंका॥ नित्यकर्मणामकरणे प्रत्यवायस्य श्रुतिस्मृत्यादि
सकलशास्त्रसिद्धतया स्यात्तां नाम तदनुष्ठानं तन्निरूपणे नैमित्तिकस्य तत्त्वे प्रमाणाभाव इति द्विती
याशंका॥ आस्तां वा नैमित्तिकमप्यावश्यकं तथापि काम्यकर्म ततः पूर्वमिति पततदनुष्ठाने मानाभावए
वेति तृतीयाशंकेति शंकात्रयापनोदनाय नैमित्तिकनिरूपणं प्रतिजानीते॥ अथो त्यादिना॥ अथ नि
त्यकर्मनिरूपणानन्तरं॥ एतेनाव सरसंगतिः सूच्यते इत्युक्तप्राय॥ सर्वेषामपि श्रेयस्करकर्मप्र
ख्यापकतया शंका रोध्यं हे त्वदधीन शुश्रूषा यहमपे च वक्ष्यामीति त्वमपि शुश्रूषां करीभवदसी त्यभि
प्रेत्य तथा संबुद्धिः॥१॥ पूर्वपूर्वपूर्वतः स्वस्वपूर्वस्य॥ अन्यथा स्वस्वपूर्वनैरपेक्ष्येण॥२॥ अतः नित्य ॥५०॥

कर्म्मैकर्त्तानेमित्तिककर्म्मणोप्यावश्यकत्वेन॥ वक्ष्यइति अन्यथा तज्ज्ञानाभावेन तदनुष्ठानस्याश
क्यकरणत्वात् अत्र॥ चैत्राद्यं फाल्गुनावधीति पुण्यचैत्रमाससमारभ्य फाल्गुनमासपर्यंतं यद्यन्नैमित्तिकम
र्च्चनं तत्सर्वं विधानमित्यन्वयः वक्ष्यच वक्ष्ये इत्यत्र कर्मत्वेनान्वयः ननु ममासे नैमित्तिकं संभवतीति
वाचैत्रादिसंज्ञायास्तत्रापि सत्वेन प्रथमपक्षस्य मलमासत्वादेव द्वितीयपक्षस्य प्रसक्तिरिति चे
त्सयेवे युज्यते ह्याद्य एव पक्षः नित्यं नैमित्तिकं सर्वं काम्यं वा गातिकं भवेत् अलभ्ययोगप्रोक्तं च मलमासे
पि कारयेदिति वचनात्॥ अ॥ चैत्रे मासि दमनकं दमनकोत्सवं नाम नैमित्तिकं कुर्यात् ॰ केमोत्सवं कुर्या
दित्यत्राह समूलैरिति मूलसहितैः दमनकैरिति शेषः एषमुख्यः पक्षः एतावद्दमनकस्यालाभादि
नागोणपक्ष माह वाथ्यागुल्मकैरिति अथवा दमनकशाखाभिरेव ॰ कथं कुर्यादितीतिकर्तव्यताकांक्षा
यामाह पूर्वपक्षे त्यादि पूर्वपक्षः शुक्लपक्ष चतुर्दश्यां रात्रौ निसकमंति ॰ पुक्षालनादिना पवित्रीकृते पा
त्रे पूजामंत्रेणाप्रोक्षितानि दमनकमूलादिरूपद्रव्याणि निधाय पूजामंत्रेणैव तत्पांगं गंधपुष्पधूपदी
पनमस्कारात्मकं चोपचारैर्गंधपुष्पधूपदीपनैवेद्यात्मकैर्वा पंचोपचारैः संपूज्य ॰ सूक्ष्मशुद्धनवीन
वस्त्रेणाच्छाद्य पूजामंदिरे कचिदेकांतस्थाने स्थापयेदित्यधिवासनं इदमेव संस्थापकस्था

पनं नाम ॥ ६ ॥ परेद्युरिति । पूर्णिमायाः प्रातःकाले नित्यपूजां तेएतेर धिवासितदमनमूलाद्भिः पुनि
शक्ति एकैकं पत्राभव तितथा पूजयेदिति ॥ अस्मिन्मासे चैत्रे मासे । पूर्णिमायस्यां कस्यां पुष्प[illegible] चि
स्पूरातं तिथौ विशेषतश्च पंचम्यो वसंतोत्सवं कुर्यात् ॥ ५ ॥ तत्प्रकारमाह कुर्यादित्यादिना तत्काले
तित देशस्याप्युपलक्षकं तत्कालानुत्पन्नानामिव तद्देशानुत्पन्नानामपि द्रव्याणां सामग्यात तदनुपाला
नं नु देशांतरगतानामपि च वस्तूनां तद्देशे घुमिलनं चेषां चित्संभवसेवेत्यभिप्रेत्य भगवता कृत्ते चंद्रैः
कर्पूरैः चंदनैः श्रीखंडैः सौगंधिकैः कहूरैः ॥ काश्मीरैः कुंकुमैः ॥ एतैः पंचभिर्वस्तुभिः ॥ पूर्ववत्पू
र्वकं थितप्रकारकाधिवासनपूर्वकं ॥ उत्सवो महादीपप्रज्वलनादिना सकलदृष्टिननाहरां पूजां
कुर्यादित्यर्थः ॥ पुष्पकोशे वसंतोधिवासपक्ष एवेति निश्चिकारः ॥ युज्यते चैतस्यामेव । पर्युषितानां
तेषां मालिन्यस्पर्शसंभावितत्वात ॥ ६ ॥ विशेषत्वड्यादि ॥ हिमपुष्करैः हिमजलैर्वैशाखी पूर्णिमायां पूर्व
वदधिवासनपूर्वकं पूजयेत ॥ हिमास्ताभेकर्पूरकस्तूरीभ्यां सुवासितैः शीतलजनकर्तव्यमित्यर्थः
॥ ७ ॥ ज्येष्ठेमासीति ज्येष्ठमासीयपूर्णिमायां कदलीफलपनसफलाम्रफलैः पूर्ववदधिवासनपू
र्वकं पूजयेत्स्वत्येकमेकैकाच्चतिप्रधानदेवतां च ॥ फलानि निवेदयेद्वाः त्वनानिवेदनस्याभइति

केचित्—सर्वसिद्धये सर्वसिद्ध्यनुगुणकाम्यकर्माधिकारसिद्धये—न तु नैमित्तिकभूतादित्तएवकर्मेति तएकापि सिद्धिः का कथा सर्वासां ॥ १ ॥ आषाढेइत्यादि श्रूत्रकुंकुंकुमान्वितचंदनेगंधका र्थे—एलाकंकोलपोर्नेवद्यस्सन्त्यानिवेदनं जातीपुष्पैः पूजनमिति संप्रदायइति निधिकृतः ॥ ८ ॥ श्रावणेमासीति अत्र पवित्रैः पूजयेदित्युक्तोपवित्रपदार्थोकांक्षायां तत्पूजाविध्यकांक्षायां चाह तिद्धधानमित्यादिना ॥ सोभाग्यदायदमिति—पुत्रवाप्युसक्तदेवीभाग्यमावः सौभाग्यं—तेनस्यात्तेन्तो तत्कर्मणः फलाधायकत्वेपिनक्षतिः ॥ १० ॥ सोवर्णैरित्यादि तत्पोतपदच्तुष्पस्पपवित्रैकुर्यादित्युत्तरेणान्वयः ॥ २ तैः कुंकुमादिरंजितैः ॥ ११ ॥ षोडशेत्यादि गुलापामेनवा गुलापामेवापवित्रंसर्वासांश्रावणेशक्तीनानाद्याधुपंचदशनित्यानांचपूकृतेशक्तिपदेनविवक्षिताना मेकैकसूदिशणानुष्ठेयं—तत्संख्येति षोडशायामेषोडशसरव्यासरग्रंथयश्च—नवां गुलायामेन वसरग्रंथपश्च्येत्यर्थः नवेत्यादिकं चिहाय—तत्संख्येति सामान्यनिर्देशात् सर्वत्रायामांगुलसंख्येव सरग्रंथ्योः पुत्येकं निर्माणमिति ध्वनितं सरग्रंथयश्चकथमाचाराणीयाइत्यत्राहश्रा

रीति आ आ आदि आदिकालमारभ्य परंपरानुसारेणोत्तिपावत्यावच्चगुरुपरंपरानुसारेणोत्तिपा
पराक्रमेणासत्पुत्तेग्रन्थिपुत्ते च पवित्रं कर्त्तव्यमित्यर्थः फलितः ॥ कुक्षिमादत्कृत्तरे जनविषयोप
मादिशन्देइतिनुटीका कूलः ॥ तन्मतेरत्नैरिसनेन नकुत्तः पौनरुक्त्यमिति विभाव्यं ॥ १४ ॥ अथवे
तिपस्मिन्यस्मिन्प्रथमद्वितीयाद्यावरणोय्यपाशक्तिसंख्या अष्टादशषोडशादिरूपा तत्तत्संख्यागु
णेः पवित्रारोपैर्दैर्घ्ये ताचत्संख्याएव कृपराणत्तावत्संख्याएव ग्रंथयप्ताादिपदग्रहीताः कर्त्तमाइत्य
र्थः इति आवरणशक्तिय विन्यासामायामसरंग्रंथिपुपक्षत्रयमभिहितकृताधिवासपूर्वं लि
तिकृतः पूर्वमयास्वीकृतः प्रकटीकृतो वायो धिवासः अधिवासितविधिस्तत्पूर्वकमित्यर्थः कृ
त्वाधिवासे पूर्वं लिखितिनुसुगम एव पाठः यथाक्रमात्पूजो क्रमेण नैः प्रत्यावरणायुगुपनात्थं वि
भिन्नव्यक्तिकतयापूर्वमवसपाद्या धिवासितैः पवित्रैः पूजयेत् ॥ १५ ॥ होमेनुष्ठेये होमार्थं कं
पवित्रं लिखितियावत एकः सोग्रंथिश्च यत्रे सेवंभूतंस्यात् तन्मानं पूर्वोक्तो ग्रन्थपक्षेविधि
षट्दैर्घ्यो युक्तं अष्टोत्तरसतैरितिसूत्रैस्त्रिकैस्त्रिवसोग्रंथिभिश्चेत्यप्याहृतपदद्वोप्यरव्वितमय यम०

घेयं । अष्टोत्तरशतसङ्ग्रन्थियुक्तैरिति टीकाकृदनुसृतमध्याहारमपेक्ष्योक्तम् अध्याहारपक्षस्याघ्येन
ज्यायस्त्वाच्च विज्ञानमात्रस्य पूजासनपर्यन्तदेहशालि । अष्टोत्तरसहस्रं ततसहस्रकमष्टोत्तरश
तग्रन्थियुक्तमष्टोत्तरशतसूत्रनिर्मितं शक्तिनाम च तत्तन्मार्गादृष्टप्रतीयमानतत्पाशशक्त्यावतारणा
मकं पवित्रं विज्ञाने सामान्ये दिति फलितार्थः ॥ १४ ॥ कुरुकुल्लादीस्यादिना पञ्चदशनित्या । कालच
क्रं । घटिकाचक्रं । मिथुनचक्रं । गलशक्तीनां परिग्रहः ॥ मूलशक्तिवदिति । प्रधानदेवतायावक्ष्य
माणां मध्ये पक्षमवलम्ब्य पवित्रं निर्मितं तेनैव पक्षेणानन्तरं न्यूनाधिकपक्षेणेत्यर्थः ॥ १५ ॥ स्व
मानेन स्वकीयकरमुष्टिमानेनाभिप्रेतप्रमाणेन पवित्रं स्वार्थे कुर्यादिति । अत्रापि सूत्रसंख्याग्रन्थीना
मुक्तैव संख्यानखेष्ठपासंख्यानुसरणं ॥ क्रमः नित्यपूजाद्यनुष्ठानप्रकारः ॥ आगमः कादिम
ततन्त्रं ॥ तपो ज्ञानवृत्तो शिष्याणां स्वीयानां स्वस्वेष्टपवित्रमाचरतीयं ॥ १६ ॥ अन्येषां क्रमागमह
भिन्नानां तु शिष्याणां योगिनीशक्तीनां चानुक्तानाम् एकाग्रेष्टपवित्रे तेष्वेव भूतेप पवित्रं स्यात् ॥ तत्र सर्व
नवसंख्याः देहे च परिधानप्रमाणेन कण्ठान्नाभ्यन्तमानेन ॥ मंजपस्थः पूजागृहस्यपवित्रमे
कसङ्ख्यया एकसमेक ग्रन्थिकं च कार्यं । तत्तु सर्वत्र संपुटाय पद्धपंनवगुणितानां तन्तूनामेकद्वि

आदिगणानेसेकः एकेनैव स्पृद्धेन तेन तु नागराणाने स्वपरः अत्रापि परिधानप्रमाणेनेति संबंध्येते·
तेन पूजामंडपदेशप्रमाणेन पवित्रस्य देश्यमुपदिष्टं भवति॥१७॥ एवमाह सूरेत्यादि बाणेन च
तेगुरुदेश्यमानकं षराणं च तिसरकं षराणेन वर्तिग्रंथिकं च पवित्रत्रयं पुष्पेके कृत्वा तानि गुणा
न देवतायै निवेदयेत्यर्थः॥१८॥ ॥ नन्वक्तपक्षाणात्र पापांशस्योक्तत्वात् तदन्यतमेन एकेन
पक्षेणा दीर्घत्वे तदन्यतमेनापरेणापक्षेणासरणाः तदन्यतमेनेतरपक्षेणाग्रंथय इत्येवं पक्षोपि किं
भगवदनुमतो नेत्याह न कुर्यादित्यादिना॰ सर्वतः देवीसाग्रंथिरूपे सर्वस्मिन्॰ एकेन तु विभि
न्ने॥ मानसोकपर्ययश्चोक्तलक्षणो॥ ननु शास्त्रार्थहानेरभावात्को दोषोत्र स्यादित्यत्राह प्रयदी
तितथा च वाचनिकोत्र दोष इति भावः॥१९॥ अथेत्यादि भाद्रपदपौर्णमास्यां केतकपुष्पैः पू
वैदिकविधिना पुनः अधिवासनपूर्वकं प्रतिदैवतमेकैकक्रमेण पूजयेत्तदसंभवे तद्दिनेन॥२०॥
॥ आश्वयुज्यां नैमित्तिककर्मानुष्ठाने अधिवासनपूर्वकं पूजनमात्रं नास्ति किंतु विशेषांत
रमपीत्याह आश्वयुज्यामित्यादिना दशोत्तरप्रतिपदमारभ्य गंधपुष्पाभ्यामुपहारेणा निवेदनी राम०
यनारिकेलादिना च देवीं पूजयेदित्यर्थः॥२१॥ प्रतिपदि शतमात्रे होमं कृत्वा द्वितीयशतसंख्या

मारभ्य तद्द्वार्थं होमं कुर्यात्ततद्द्वाप्रतिदिनं शतशश्च द्विपक्षमाश्रित्य तथा च प्रतिपद्दिशात्तद्रूपं द्वि
तीयायां शतत्रयमित्येवं रीत्या पौर्णमास्यां षट्शताधिकसहस्रसंख्यया जुहुयादिति फलितार्थः जपो
प्येवं द्विपक्षमाश्रित्याचरणीयः ॥२२॥ एवं कन्यायां अविवाहितायां पुरुषसंसर्गरहितायां च प्रतिप
दमारभ्यैकैकवृद्ध्या देवीमावाहनपूर्वकं पूजयेत् भूषणावस्त्रदक्षिणाभिः कन्यां परितोष्य देवीं त
तो विसर्जयेत् ॥२३॥ एकादिसंख्यया एकवृद्धिपक्षे द्विवृद्धिपक्षे त्र्यादिवृद्धिपक्षमाश्रित्य एवं नैमि
त्तिकर्मानुष्ठानं केवलं प्रत्यवायपरिहारमात्रं भवति किं त्वभ्युदयोऽप्यधिकः इत्याह नेनेत्यादिना मंत्रसि
द्धिः पुरश्चरणादिमहाक्लेशसाध्यापि एतन्नैमित्तिकवैभवात्संपद्यते नः अर्चकस्य साधकस्य नृपतित्वम
पि स्यादित्यर्थः ॥२४॥ कार्तिके मासीत्यादि कार्तिके मासि पूर्णिमायां तिथौ रात्रौ कुंकुमेन घृतपूर्तिदी
पैश्च देवीं समर्चयेत् तदंते नित्यहोमप्रकारेण होमममप्याचरेदित्यर्थः वस्तुतस्तु होममित्यस्य प्रदीप
विशेष्यविशेषणवाचकपदमध्यप्रविष्टत्वाद्दीपात्मकएवात्र होमो विवक्षितो न स्वतंत्रोपि ॥२५॥
विद्यया प्रधानमूलमंत्रेण षोडशसंख्यान घृतपूरितदीपान् प्रधानदेव्या अग्रे पुरतो न तु दक्षिणवा
मभागयोर्निवेदयेत् एकमेकं दीपं शक्तीनामावरणशक्तीनां न च संख्यानो परत्तोपि तत्तद्दीपानिवेद

सुदर्शन

येदिसर्थः। आत्त इयत इति। तत्रस्थस्योद्देशपदेवीनां पूजन इत्यर्थः। मानि घिकन स्तूपूर्वस्या पित दीपघोडश
कस्याग्रतः प्रथमावरणाशक्तिदीपाः तदग्रतो द्वितीयावरणादीपाः एवं क्रमेणोत्तरोत्तरावरणादीपा निवे
पाइत्यर्थमाहुः ॥२६॥ एवं पक्षासमर्थमधिकृत्याह अथैव तिएकस्मिन्विस्तृते ताम्रादिपात्रे मध्ये घृ
तपुज्वलितं दीपं दीपं निधाय तस्याभितः परितो घृतप्रज्वलितान्दीपान्निधाय। तत्रैकं पुष्पं दीपपात्रे नि
धाय। मूलविद्यया दीपदशके प्रधानदेव्यै किंवान वावरणेभ्य एकैकम ध्यस्थं प्रधानदेव्यै निवेदयेदित्य
र्थः॥२७॥ मार्गशीर्षे चेत्यादि मार्गशीर्षपौर्णमास्यां धाय। तत्रैकं पुष्पं दीपपात्र सकर्पूरनारिकेलजलं च
घा धिधिसाधिवासनं निवेद्यमिति पक्षापूपैर्वा कापरपर्यायैः प्रतिदिवसं चतमेकैकक्रमेण पूजयेत्तत्र
कानामपि सद्योधिवासनपक्ष एव। पूर्वदिनाधिवासनपक्षस्य प्रतिषिद्धपर्युषितताकतरवस्तु नि
वेद्यविषयस्येह प्रवृत्तौ मानाभावात्। सद्योधिवासपक्षस्य पुष्पे दौ भवतोप्यप्युपेपत्वात् ॥२८॥ पुष्ये
मासीति गुडशर्करयोरन्यतरेण स्नापनीते गव्यद्रुं च यस्य चपुरतो निवेदनेन पौषमासीपपौर्णमास्यां देवी
पूजयेदित्यर्थः ॥ इह स्थाने मित्तिकाकारणपुस्तकप्रत्यवायपरिहारस्य सिद्धये उत्तरोत्तरकालानुवृत्तये
॥२९॥ माघ इत्यादि शुद्धैः श्वेतैः इतरत्कृष्णं। दिभिः॥ अत्र श्वेततिलानां मुख्यत्वं तदन्यतिलानां गौणं राम०

स्वमभिप्रेतं अन्यथा तिलैरिक्षवत्रपानं ॥ दुग्धरूपेणैव वा शर्करासहिता अपूपाः ॥ आदिना फलानि च स
हातन्मासीप्य सर्वदिने भुनि वेदनीयाः ॥ ४८ ॥ फाल्गुन इत्यादि सुवर्णसंभवैरजतसंभवैर्वा कमलैः ॥ अ
त्र पुष्पैः कह्लारपुष्पैः सुगन्धपुष्पैश्च पुष्पस्रवापपरिहाररूपेणितसिद्ध्यर्थं पूजयेदित्यर्थः ॥ ४९ ॥ विषुवेत्या
दिना मेषकर्कटमकरसंक्रान्तिषु दर्शेषु अमावास्यादिने युगादिषु कार्तिकशुक्लनवमी वैशाखशु
क्लतृतीया माघशुक्लपञ्चदशी भाद्रपदकृष्णत्रयोदशी युगाद्येषु अर्द्धोदयादिपर्वसु आगमोक्तेषु
गुरुजन्मदिन गुरुव्याप्तिदिनादिषु वैशेषिकं पूजनं अधिकभूषणमालादिश्च वस्त्रभूषणसम्भृतैर्नैवेद्यदक्षि
णादिभिः पूजनं कुर्यादित्यर्थः ॥ ५० ॥ एतावता नैमित्तिकं यागं समाप्य काम्यकर्मनिरूपणीयं ॥ तत्र च का
म्यकर्माधिकारिजिज्ञासां प्रथमतो निराकर्तुमाह निर्व्याजा दिव्या पता मनामिति ॥ अनिगृहीते द्रियाणां
वक्ष्यमाणलक्ष्मीपूजनादिभिर्मनसो विकारप्रादुर्भावे नाधिकस्यानि ष्टस्यैव प्रसक्तेर्निगृहीतचित्तकल्व
लक्षणायतात्मकत्वमाचरयकमिति भिप्रायः समर्चनमिति यद्यपि यत्र होमादिनानाप्रकाराः प्रयोगाः
सन्ति तथापि संपूर्तं समर्चनं साध्यामेव काम्यरूपाणि षट्कर्माणि प्राप्यन्त इत्यर्थः काम्यपदा
र्थाचितं साध्यत्वमेव समर्चनपदेनोत्तरस प्रक्ष्यामस्य अर्थः ॥ ५१ ॥ तर्हि यन्त्रादिप्रयोगाः कुत्र वक्ष्यन्ते इत्यत्राह यं

सुदर्शन

134

त्रोत्पादयंत्रहोमेषु प्रसिद्धो क्रियायुक्तलिकादिकरणं ध्यानेनतत्तदुक्तार्थस्मरणं योगः साध्यस्यात्मनोरैक्यभा
वने तर्पणपूजने च प्रसिद्धे एते सप्तभिः पदार्थैः साध्याविकाम्यकर्माणि। तत्र तत्र योगप्रस्तावे प्रोक्तानि
अग्रे च वक्ष्यानि।। प्रदर्शित एव हि प्रोक्तानीति भूतार्थकथयोपोपपादकः श्लोकः।। समर्थेनाद्यतस
मर्थेन साध्यप्रयोगेभ्यो तिरिक्तानि षट्कर्मस्वरूपस्य यथा तंत्रांतरोपात्तस्यैवेहाप्युपादानं तथा तत्तन्ना
मान्यप्यत्र भविष्यंतीति भ्रममपनिनीषया प्रकारांतरेणाग्रे प्रोक्तानि। पूजा साध्यास्तत्प्रयोगाः संप्र
त्यमे च प्रोच्यंते इति भावः।। ८४।। षट्कर्मनामान्याह रक्षेत्यादि तंत्रांतरे प्रसिद्धान्येव तेषां स्वरूपाण्यत्रो
पादेयानीत्यभिप्रेत्य नात्र तेत्रे त्यात्तत्रैणालक्षणाकथनद्वारास्तत्स्वरूपं निर्दिष्टं।। तत्र रक्षा चौरव्याघ्रादिसं
भावयभयानुत्पादानुकूलोव्यापारः।। अनुत्पादश्च प्रागभावपरिपालनं भवति हि राजादिकृतात्व्या
पारविशेषाद्दुर्जसैवकोनोनकदापि चौरादिभयं निपततीति भये प्रागभावस्योत्तरोत्तरानुवर्त्तनमस्य
परिपालनं।। असततुराजकायेतथाव्यापारभयरूपं प्रागभावस्य प्रतियोग्येव समुत्पद्येतेतिसमुत्प
न्नमात्रे भये स्य प्रागभावेशमयेदितिकृतत्वाल्लनसंभावना। अथ भयं तत्प्रसिद्धं न वा प्रसिद्धत्वे क
दाचित्तद्वत्येत्तेरावश्यकत्वेन कथं सर्वदा तत्प्रागभावपरिपालनं न हि कदाप्यनुत्पत्तिमदपि प्रसिद्धं ।।५०

भवतिअत्रराज्ञःअत्रासिन्नवपुरूपेनदभावेपिपुरुषान्तरेप्रसिद्धमयस्यात्त्वपुरूषेप्रागभावःपरिणम्यते
इतिचेत्-नअन्यवर्णिन्नमयस्यान्यत्राप्रागभावासंभवात्प्रागभावध्वंसयोःप्रतियोगिसमवायिदेश
नियतत्वात्॥अप्रसिद्धत्वेप्युत्तरोत्तरप्रागभावस्यासंभवः।अत्रेदंभविष्यतीतिप्रतीत्यात्तत्सिद्धेरितिचे
न्न।एवंतर्हिताद्दशभयप्रत्येकाभावीयोत्तरोत्तरकालसंबंधानुकूलोव्यापारएवतत्त्वास्तु॥अतएवताभाव
तत्संबंधयोःसनातनयोरप्रयोजकत्वाभावेपिस्वप्रतियोगिसंबंधविघटकव्यापारेस्वसंबंधप्रयोज
कत्वसकलजनप्रतीतिसिद्धमभ्युपेयतएवेति-शान्तिः।उत्पन्नरोगप्रकृत्यादीनांध्वंसः॥अथजयोना
कःपदार्थःनवैरिपीडानुकूलोव्यापारःनिघ्नेतिव्याप्तेःवादजयेऽव्याप्तेश्च॥नहितत्रशारीरपीडाका
चिद्भवति॥नापिदुःखानुकूलोव्यापारःस्तंभनादावव्याप्तिप्रसक्तेः॥नापितत्तद्देशाद्यपहरणानुकू
लोव्यापारःवादजयादावव्याप्तितादवस्थ्यात्-किंचअपहरणस्यनाशस्यवास्वत्वेशान्तोवन्तर्भावप्रसक्तेःस्वा
धीनताकरणापक्षेप्सामेतभीवसंभवाज्जयस्यपार्थक्यानापत्तेः॥नापिवैरिणःस्वाधीनताकरणमेवज
यः॥मारितेपिवैरिणिशत्रुर्जितइतिप्रतीतेःनतदानीसस्वाधीनीभूतइत्युच्यतेपलायितेपिवैरिणि
जितइतिप्रतीतेश्च-नहितदानीसस्वाधीनीभूतःइतिचेत्॥उच्यतेवैरिविषयकःस्वकर्तृकत्वेननिश्चि

तोपोर्थस्तदनुकूलो व्यापारस्तथा भवति हि वैरी शिक्षणीयो बंधनीयो देशाद्बहिर्भ्रंशनीय इत्याद्यभिप्रायेण यद
स्वाभिप्रेतोर्थस्तदनुकूलव्यापारवान् राजा द्विजपीडादौ द्विजपेपि स्वाभिप्रेतार्थसाधनेन जपत्वमक्षुण्णम
।। अननुकूलत्वे चोपघातघातकत्वेन स्वरूपयोग्यत्वेनाप्नोपव्यापारे कृतेपि न फलोत्पत्तिस्तस्य जपित्वा
पत्तिः ।। ननु यत्र वैरी विद्यमानो नेपद्रुत एवं स्वाभिप्रेतोर्थस्तत्र तस्य पलायने मारणोच्चाटनादौ जपि
त्वानापत्तिस्तथा व्यवहरति च तादृशेपि स्थले लोकाः राजापि जपमान इतीति चेन्न न राजा शपमनभिजानानं ज
नामकनामतथाव्यवहारः राजा स्वेहं जपीति न कथंचिदपि बुध्येतीति सजयोनभयसेव शत्रुगतानिष्ट
कारित्वमात्रेणोक्तस्य तथा प्रयोगो गौणः ।। ननु यत्र वैरी मारणमेवाभिप्रेतार्थस्तदनुकूलव्यापारत्वस्य तत्र
निधनेतिप्रसक्तिरिति चेत्त न केवलमारणानुकूलव्यापारत्वाद्यस्यपलापनलुंठनेदेशविभ्रंशीकरणा
दिसाधारणस्य व्यापकतत्पार्थक्यानुपपत्तेपस्करेपि चोपाधेरसंकरात् ।। एतन्मारणातिरिक्तत्वे स्वाभि
प्रेतार्थे दत्त्वा निधनेतिप्रसक्तिः परिहर्तव्येति मतं तेन तत्रानुमतमस्माकं तथा सति शत्रुमारकेपि ताद्वि सर्वे
जनसिद्धस्य जपित्वपुष्यो गस्य व्याघातापत्तेरिति दिक् ।। लाभः स्वस्वत्वाभाववद्वस्तुनि स्वस्वत्वसंबंधः ।।
सच पुत्रदारादिः कस्यचित्स्याद्धायुत्यत्याकस्य भूमिप्रभुत्वादेः स्वीकारेण ।। परवहापस्वत्वाभा स्व१ ८म०

चवृद्धस्तु नीत्येतावत्पर्यंतानुधावनस्य किंप्रयोजनमिति चेत् अपराधान्वेषणकुशीधनाढ्यैः स्वीकारस्यापि संग्रहा
र्थमिति ॥ नवीनास्तु अन्नेषु च पुत्रदारादिषु परस्वत्वाभावात् कथं तत्र स्वामत्वेऽस्यादिति च विभावय ॥ निग्रहः इ
ति साध्यस्य स्वाभाविकः स्वभावो निग्रहः तेनेन कर्मणेति प्रसक्त्या निग्रहश्चान्दोपयोगः हृष्टः ॥ स चात्रित्रिवि
धः ऽत्तेमनोच्चाटनं द्वेषणाभेदात् क्रोधोद्योगगतीनां रोधनमेव स्तंभनं ॥ रोधनं च तत्तत्कर्मसाधकप्रव
त्यभावानुकूलो व्यापारः ॥ उच्चाटनं च एकत्र चिरकालस्थितिविरहानुकूलो व्यापारः द्वेषणं च परस्परं प्रीतिमा
पन्नामुदासीनानां वा परस्परं विरोधजननं ॥ विरोधश्च तदनिष्टविषयकेच्छा ॥ निधनं च मरणोद्देश्यकत्वे स
ति मरणानुकूलो व्यापारः दैवात् यत्र कूपे ब्राह्मणः पतितस्तामत्तस्तत्र कूपकर्तुः खननात्मकव्यापारस्य म
रणानुकूलत्वेन ब्राह्मणाहतत्वापत्तिरतः सत्यंत नहि मरणोद्देश्यकोऽस्य स व्यापारः मरणस्योद्देश्यत्वं कि
तेन वाक्यतेमरणानुकूल खड्गाभिघातादिव्यापारेण हेतुत्वं सर्वप्रपि श्रितप्रयोजकमित्यतो विशेषदले
॥ न च त्रिविधस्तवपाठस्य दलस्य पार्थवत्वेन तत्कर्तुरात्महिंसकत्वापत्तिरिति वाच्यं अदृष्टाद्वारकत्वेन व्या
पारस्य विशेषणीयत्वात् ॥ न हि स्तवपाठः खड्गाभिघातादिवत् साक्षान्मरणप्रयोजकः किं तु स्वजन्यादृष्टद्वा
रेति नातिप्रसंगः ॥ अस्मत्कृतस्तवपाठादेः यदि मनुष्यधर्मत्वादावश्यकं मरणं तदा गंगोद्देश्य एव भवति

तिदेशविशेषणे वमरणानुकूलेच्छकत्वेनोद्देश्यपोनमरणमिति नातिप्रसंगसंभावना मारणप्रयोगस्य हिंसात्व
मस्त्येवाभावादभयप्यापि श्येनाश्वमेधयोर्वधाच्चेन नरकमिति न्यायेन श्येनादियागदृष्टानानावशीपोपंशि
ष्टानो ॥ तदुपादानेतुश्येनस्येव निषेधशास्त्रविषयतानामेहि केष्ट सिद्धये सफलमित्यासंतोप्रासेसिगिक
कथयति ॥ नतुराजादेःस्वापत्राता करणाकुत्रांतंभवति वनिताफलमूलादेराकर्षणे वा कुत्रांतमवतुनरक्षा
पात्रनिष्ठानुत्पादस्यानुद्देश्यत्वात् नापिशांतो भ्के सहूपत्वाभावात् नापिजपे वैरिविषयत्वाभावात्तन
वाला भेस्वत्वसंबंधस्तत्वाभावात् नापिनिग्रहे स्तंभनाद्यन्यतमत्वाभावात्तनयानिधनीधनेमरणानुकू
लत्वाभावादित्याशंक्याहतदंगत्वादिति अन्येषां रक्षादिषट्कातिरिक्तत्वेनतेत्रातरोक्तानामपि वश्याकर्ष
णादिकर्मणां तदंगत्वात् रक्षाविषट्कान्यतमशरीरएवप्रविष्टत्वात् ॥ यच्चकनक्काष्टकर्मणः कर्मत
त्वेपा ॥ स्थितिः क्वचस्थितिः नास्तिकितंत्रे चेवपश्यासेभवमंतर्भावइतिभावः ॥ अयमाचः सर्वेष्वपि व्या
पारेषुराजादेःस्वायत्तताकारस्तेनज्जपएवक्रतप्रवराजानेनजितइतिव्यवहरंति सर्वेष्वपिकर्मस्वस्त्री
जनापत्येस्त्रीजितइतिवदंतिवशीकृतइत्येतिच ॥ यथाहि समानेपि प्रीतिविशेषे भगवद्विषये गुरु
पित्रादिविषयभक्तिरितिवनिताविषयेरतिर्भावः ॥ अथ इति मित्रादिविषये प्रेमस्नेहादिपदैरभि राम०

लापस्तथाशत्रुविषये केनापि प्रकारेण।।वशीकरणे जनराजादेस्तत्र जप इति वश्यमिति चेति।। आकर्षणं
तु नियेहलाभे वांतर्भवतीमस्तु जपजपादि प्रयोगस्य रक्षापां शांतौ वांतर्मर्विंतुमर्हतीति-प्रचक्रयारणां स्तं
भने निग्रहांतःप्रविष्टे।। मोहनमपि जपस्येत्यादिस्थापमूहनीयं।। अपा।। नानिरक्षादि षट्कामकर्माणि
चैत्रांतमिति चैत्रस्तदंतौ वैशाखादि फाल्गुनांतमाससमुदाय इत्यर्थः तथाच चैत्रादि मासेतिफलिता
र्थः चैत्रादिमास-तिथि-वार-देशविशेष-राज्यादिरूप-कालपूजाद्यावरणामभिधानपूर्वकं वक्ष्यामी
त्यर्थः तत्र मंडलादि स्त्रयेद् शक्तितद्वलादिरूपः कालस्य देशकालपदोपादिपः।। तत्र चैत्रादि पुवतत्रा
त्रेत्यादिना मासाभिधानं प्रतिपत्तिथिमारभ्येत्यादिना तिथीनां रविवारेत्युक्तां भौजे इत्यादिना वाराणां
पर्वताग्रे यजेद्देवीमित्यादिना रक्षायै भूपुरेइत्यादिना च देशस्य फल्लाशकुसुमे निशीत्यादि नातानिवै
त्रादि रूपत्वइत्यादिना च कालस्य-व्रीहिमाषवेत्यादिना पूजाद्यावरणाम मिधान।। देश कालेरित्यत्र
कालशब्दो मुहूर्त्ते वाचीति मनोरमो ।कि स्तमुहूर्तस्याग्नेविनियोगादर्शना चिंत्यमूलं।। रुद्ध।।भुपुरादि
स्वरूपं तंत्रांतरात्क्रमेवेहोपादेयमित्यभिप्रेत्य तत्स्वरूपमनुक्त्वापदंप्रो विशेषस्तमंशमाह हरक्षामेद्

त्यादिना रक्षा हितं तन्त्रान्तरे त्याशान्तौ वश्ये वान्तर्भवतीति तदुपयोगि जलमण्डलं च वह्निमण्डलं वा न तु भूमिमं
डलं ॥ लाभस्य तन्त्रान्तरे वश्यकर्मत्वात् तदुपयोगि वह्निमण्डलमेव न वायुमण्डलं ॥ स्तम्भने भूमिमण्डलमेव तन्त्रा
न्तरेषूक्तं ॥ उच्चाटने वायुमण्डलमेव ॥ मारणे च वह्निमण्डलमेव न व्योममण्डलमिति प्रकृततन्त्रे विशेषाभिधानं
॥ प्रस्तुतदेवतामात्रपरं एतत्तन्त्रमात्रानुसारिप्रयोगमात्रपरं वेदं ॥ देवतान्तरपरं तन्त्रान्तरानुसारिप्रयोग
परं च तन्त्रान्तरमिति व्यवस्थेति वः ॥ ३१ ॥ पीतेत्यादि पीतद्रव्यैर्भूपुरस्य पूजनं श्वेतद्रव्यैर्जलमण्डलस्य अरु
णैः रक्तद्रव्यैर्वह्निमण्डलस्य असितैः कस्तूर्यादिभिः पवनव्योममण्डलयोर्धूम्रद्रव्यैरिति सामान्यनिर्देशात्पू
जोपयोगि सकलमपि गन्धाक्षतपुष्पवस्त्रादिरूपं द्रव्यं तत्तन्मण्डलाधिकरणकसर्वदेवतापूजायां
तत्तद्वर्णकमेवोपादेयमित्युक्तं ॥ अत एव भूतमण्डलपूजायामेवंभूतानि द्रव्याणीति मनोरमाकृतोक्तं
तन्न युक्तं भूतमण्डलानां पूजाकर्मत्वेन मूलादनुपलब्धेः ॥ अत एव निमज्जनादिषु पीतादिभिर्द्रव्यैः पूजयेदि
ति मूलात्र यथाकाम तन्त्र कामनाविशेषेण देवीपूजायाः एव प्रतीतेः ॥ किं च देवीपूजोपयोगिवस्तूनां
वर्णाकांक्षायाः स्वेच्छयापरिहारमपेक्ष्य तन्त्रान्तरोक्तप्रस्तुततन्त्रोपस्थितपीतादिवर्णैरेव सा निराकर्तु
मुचितेति माति ॥ अतः प्रतिदिनं प्रतिरात्रि च प्रत्येकं तत्तद्रूपं भवति तत्र च त्रिंशद्घुटिकाप्रमाणस्य राम०

स्मिन् स्मरात्रेर्वा तादृश्याः षोडश विभागे पंच पंच घटिकाभिर्वसंतग्रीष्मक्रमेण दिवारात्रौ चक्रात् तु षड्ढि
मेकशोरा वक्तव्या त्वहोरात्रे भुक्तं भवति॰ तत्र चक्रमेण रक्ता दिषट्कमणिका कर्तव्यानि॥ दिनरात्रिप्रमाणाद्
द्धिह्रासयोस्तु मासस्यापि वृद्धिह्रासौ भवतः इत्याह षोढेत्यादिना॥ ३२॥ तानि खंजानि दिनस्मरा
त्रेर्वा षट्संख्यानि खंजानि॥ चैत्रादिक्रियातत्वः चैत्रो दि द्विमास निर्वर्त्यो वसंतग्रीष्मादिनामको त्रक्रतवः
॥ स्वे समये कृद्धि द्विमासक्रमेण॥ नुदीरिताः तेत्रांतरेषूक्ताः तत्त्वैवकाल्पनिकोपमर्थस्तथा चंगौणामुख्य
कल्पनाभ्यां द्विधावसेनादिकर्त्तुरितियं पूर्व सिताअर्थः नित्यपूजेत्यादिना प्रयोगानुपदर्शयति॥ ३३॥ ल
लितेत्यादि॰ अयं हि निगलितार्थः त्रिपुरा॰ त्रिपुरेशी॰ त्रिपुरसुंदरी॰ त्रिपुरवासिनी॰ वि॰ त्रिपुराश्री॰ त्रिपुरमा
लिनी त्रिपुरसिद्धाः त्रिपुरांबा॰ महा त्रिपुरसुंदरी॰ ललिता॰ कामदा॰ कामा॰ इति द्वादशनामानि चैत्रवैशा
खादि द्वादश मासानां क्रमेण भवंति॰ तैरेतैर्नामभिश्चैत्रादिमासेषु स्वक्रमप्राप्तैस्तत्तन्नाम बोधितमूर्ते
र्देव्याः पूजनेन तन्नामबोधितदेवीमुद्दिश्य तन्नाम्नैव कृते दानं कर्त्तुर्वर्जा रोग्योत्पन्नरोगशोतिविशिष्टं स्वा
भीष्टं पशुपुत्रराज्यधनसमृद्धिरूपे साधयतीत्येकः प्रयोगः स्वपूर्वश्लोकोत्तरार्द्ध॰ स्वात्र श्लोकपूर्वा
र्द्ध सहितत्वात् रिंशत्तमश्लोकपुनिपाद्यः कश्चित्॥ ३४॥ व्रीह्यादिषट्कप्रसिद्धं पयः क्षीरं नैवेद्यं वस्त्रए

नेरष्टदुब्यैर्युक्तं पत्रस्वर्णरत्नतिलमुक्तारूप्यंद्रव्यचतुष्टयं। तदेकशः संभूय तत्र द्वादशद्रव्याणि तत्क्रमास
क्रमप्राप्ता नि प्रत्येकं चैत्रादिद्वादशमासेषु तत्तन्नाममंत्रैरेव तत्तदभेदवत्वेनाभ्यंतवसितायमूलविद्यो
पासकाय दद्यात् इदं तु तेषु तेर्हान पूजनैरमीष्टं प्राप्नोतीति पूर्वोक्त एव प्रयोगः किंदेयकथंदेयकस्मैदे
यमिति शंकात्र यन्निरासार्थमुक्तं न तत्प्रयोगांतरफलांतराश्रयणात्॥४१॥ कदंबकैर्युक्तो यो बिल्वादि
रित्यष्टयादपमात्रागच्छाद्युष्टमात्रमाणं भवंतीति प्रासंगिकमात्रं तन्नहीपत्वकथनं॥४२॥ चंदनादि
ग्युक्तं मोक्तं तथाचामृतरुकर्चूरकचंदनश्रीखंडजाख्याः कामरूपपूर्णगिरिजालंधरोड्यानपीठगा
वीषठगाइत्येवमलाक्षरार्थः॥ तथा चक्षेमात काघायवक्षांत द्वादशवरूकपुर्पीठस्थानीयेषु चैत्रा
दिमासेषु देवीयथाविधिपूजयतामाज्ञाशक्तिः शास्त्रेषु श्रद्धा च दृढा भवतीति द्वितीयः प्रयोगः॥४४॥
चैत्रादिमास निर्वर्त्य च संतादित्तं भवैः पुष्कैस्त त्रद्वसंतादिकालमभिव्याप्य नित्यां प्रधानदेवतां पू
जयतश्चापुरादिपंचकं स्वस्वोद्देश्यभूतं सिद्ध्यतीति तृतीयः प्रयोगः॥४५॥ प्रतिपदित्यादि शुक्ल
प्रतिपदि एकाचत्वाकदलीफलगुडनारिकेलानां प्रत्येकं हुत्वा द्वितीयायां द्याद इत्येति क्रमेण पूर्णि एम०

मायां पंचदशाहुत्यात् त्रितयमध्ये कैकशो जुहुयात ॥ ४६॥ ततः कृष्णप्रतिपदि एकहीनया पूर्वदिनप्राप्त
पंचदशसंख्ययाततस्त्रिकं पुष्पं कैकशो हुत्वा द्वितीयादिष्वेकैकह्रासक्रमेण जुहुयात ॥ एवं कृते कृष्णच
तुर्दश्यामेकसंख्यया होमे लब्धे ततो न्यूनसंख्याया अभावाद्दर्शे होममेव न स्यादित्यत आह दर्शे त्वेक
मिति तथा च वाचनिकमेकसंख्यया होमविधिर्दर्शेऽपि भवतीति भावः॥ एवमुक्तदिशा मासमात्रं शुक्ल
प्रतिपदादि दर्शांत त्रिंशत्तिथिसमुदायरूपे होमानुष्ठाने साधकः लब्धप्रयागजराज्याद्दिसंपत्स्या
न्न पौनःपुन्येन भवेदिति चतुर्थः प्रयोगः॥ यद्यपि पूजाप्रयोग एवेदानीं निरूप्यत्वेन प्रतिज्ञात इति क
थमिदानीं होमप्रयोगाभिधानमिति शंका भवति तथापि पूजाप्रयोगाणामाधिक्येन कथनात् पूजाप्रयो
गपदेन पूजाप्रयोगाणां मध्यपातिनोऽस्यापि प्रतिज्ञाविषयत्वं दृष्टो हि छत्रिणो यान्तीत्यादावछत्रि
णामपि छत्रिपदप्रयोगः इति शंकापहारः संभवति॥ वस्तुतस्तु पूजाप्रयोग एवायं होमोऽपि तदंगतया विव
क्षित इति न कापि शंका॥ मूलमन्त्राधिगतोऽयमर्थः इति चेन्न होमेऽप्येवं दर्पीत्यपि ना कदलीफलादि त्रिकक
रणकपूजनस्य मुख्यत्वं होमस्तु गौण इत्यर्थसूचनात॥ ४७॥ रविवारादिषु सप्तसु वर्षमात्रं प्रतिवारं रक्त
कमलादिकोत्पलांतपुष्पसप्तकेन पूजनं पायसादिघृतांतद्रव्यसप्तकस्य प्रत्येकं क्रमाद्रविवारादिषु नै

सुदर्शन

वेद्यतया निवेदनं गंधाक्षतधूपदीपादिभिश्च पूजनं कुर्वतो ग्रहपीडोपशमः सुखप्राप्तिश्च भवतीति पंच
मप्रयोगश्च चान्द्रार्मिः श्लोकैः स्पष्टः ॥ सितेदृति गुरुशुक्रवारयोः शर्करान्निवेदनीये समिप्रेस द्विवचनं ॥ ४८
४९ ॥ ५० ॥ ५१ ॥ पूर्वनिर्दिष्टावस्य मारणावापूजा सर्वापि श्रीचक्र एव करणीयेति सिद्धांतः तत्र चक्रं कथं तन्नि
र्माणं कुत्र चेति शंकाद्वयमपहर्तुमाह चतुरस्रमित्यादि चतुरस्रं भूपुरमारभ्य॰ ग्रामधामात मुख्यदेवता
निवासस्थानभूतत्रिकोणागतविंदुपर्यंतं नवचक्राणि चतुरस्रं षोडशदलाष्टदल॰ चतुर्दशार॰ दशा
रद्वयाष्टारत्रिकोणविंदुरूपाणि॰ सन्ति॰ तत्र स्वस्वपूर्वपूर्वचक्रादुत्तरोत्तरमेकैकं चक्रमुन्नतोन्नतं मू
र्द्धीर्द्धीभूतमनुक्रमेणाकारयेदि भवति तत्साधने धनसंपत्तसिद्धी सत्यानिधने मारणोत्स्यान्नतत संपत्ति
भोगं कुर्यादित्यभिप्रायः ॥ ५२ ॥ अथ चतुरस्रषोडशदलाष्टदलरूपप्रथमत्रिकाच्चतुर्दशारदशारद्
वयरूपमुत्तरत्रिकमुन्नतं ततोपि चाष्टारत्रिकोणविंदुरूपमुत्तरत्रिकमुन्नतं क्रियते तदा श्रीप्राप्तिर्भ
वति परं तु पुत्रकन्यापौत्रादिपरिवृद्धिर्ध्रुवं स्यात ॥ ततः श्रीचक्रादिशेतदृस्यात ॥ अथ प्राथमिकाच्चतु
रस्रादेकस्मात्तदुत्तरभाविद्वयं षोडशदलाष्टदलरूपमुन्नतं तदुपरि तो पद्मगे तत्र चक्रषट्कमुन्नतं यदि क्रि रा॰म॰
येत तदा कर्त्तुः श्रियो भवंतीत्यर्थः ॥ कश्चित् षट्क्रमेणाउन्नामनमुन्नतमिति समस्तमेकं पदं द्वितीयोतेन

थाचस्वस्वश्रियैकीर्त्यैचईदृशंचक्राकल्पयेदित्यन्वयः॥५८॥नवानिपूर्वोक्तप्रकारेण्योनूतनानिकृत्तए
वसमानिपूर्वपूर्वापेक्षयाउन्नतत्वनीचत्वादिरहितानिरूपाणिस्वरूपाणियेषामेवंभूतानिपूर्वो
क्तचक्राणि अर्थान्नवसंख्यानियदिरच्यंतेतदातुश्रीचक्रंसर्वेषांअर्थानांसिद्ध्यैभवतीतिसर्वथात्रैव
यतनीयमितिभावः यद्वानवानीत्यनेनैवसमोन्नतत्वलब्धे समरूपाणीत्यनेनतुसर्वाणिदलानिसर्वेको
णाश्चसमानपरिमाणाएवकर्तव्यानवेत्येपोगांतकथितंनवानीतिदिक्तत्वात्सिद्धंचक्रगतनवसंख्या
परमितिनिश्चिमनोरमाकृतौ॥उपपादितान्वदिव्यत्वकल्पनामगातिकगातिरूपं विनापिपाठशुद्धिः क्र
मादित्यनेनपूर्वस्मात्पूर्वस्मादुत्तरोत्तरस्यानुकल्पत्वंध्वनितंकामनाभेदेनरत्नादिपंचकेश्रीचक्रनि
र्माणस्यफलंनिर्दिशतिलक्ष्मीत्यादिना॥रत्नेश्रीचक्रनिर्माणेगजरथाश्वादिसंपत्तिसिद्धिः स्वर्णे
कीर्तिलाभः रूप्येकीर्तिप्राप्तिः ताम्रेपुत्रलाभः दृषदिगजकीनमेदायाधारोत्पनारोग्यप्रभृत्यादिलाभो
भवति॥५५॥आदिनापित्तललोहादिसंग्रहः॥पूर्वोक्तविपरीतेलक्ष्मीकीत्यादिविरहः॥५६॥लो
भोपचित्रेष्वा॥मोहेनस्नेहादिवशाद्दत्तलुंचनीयमित्रादिवचनेन॥अज्ञानतः प्रत्यवायशास्त्रस्याना
कलनात्॥सर्वथानियमेनतत्वन्नप्रवृत्तिः क्रियापीतिभावः॥५७॥अथखेचरीसिद्धिः पाक्षणीसिद्धिः

सुदर्शन

चेरकासिद्धिः पिशाचिकासिद्धिः वेतालसिद्धिः कृत्यासिद्धिः मायासिद्धेरूपाणां सप्तसिद्धीनां साध
नप्रयोगान् अंचदशश्लोकैराह। यतिःपर्वताग्र इत्यादिना पर्वतस्य पस्य कस्याप्युपरि भागे स्थित्वा रात्रौ
सिद्धद्रव्यैः पलाशपुष्पैश्च सप्ताहं देवीं पूजयतः साधकस्य खेचरीमेलनं खेचरीशक्तिलाभः स्यात्॥
किं वा खेचरी नाम का विद्या किंरूपा मारूपा आकाशसंचारणो सिद्ध्यातिस्या मिलनेस्यापन्ना भवतीत्य
र्थः॥ ५॥ द्वितीयसिद्धिमुपायः सार्द्धकश्लोकेनोक्तः स्थलीभूतो कुंजे पर्वतगुहायां मासमात्रं नियमे
न कदंबपुष्पाभ्यां सिद्धद्रव्यैश्च देवीमर्चयतो यक्षिणा यक्षः प्रत्यक्षीभूयाभीष्टार्थं प्रकर्षेण तासाप स्ये
नयच्छेति॥ ६॥ केतकीकुसुमैः स सिद्धद्रव्यैर्मासमात्रं समुद्रतीरे देवीं पूजयतो नीलपताकापुरस्ले
वक्ष्यमाणाख्येटकानामधेयाः शक्रयः सिद्धा भवति ६० सिद्धाश्च तास्तस्य साधयितुराज्ञां कुर्वति।
स्थूभीष्टांत्रिलोकस्थापुयच्छति रतोशत्रुपराजयकेरीनानाविधाश्चर्यकेरीमायां च कुर्वंति माला
भूषात्मकं वस्तु चस्ता धकस्येहयावाछेयापुयच्छेति। नसरक्तकिंल निशमेवेसर्थश्रीज्ञामित्यादेः
॥ ६१॥ चतुर्थसिद्धमुपायं तत्कसंवश्लोकद्वयेनाह यद्येत्यादिना वक्ष्यमाणेन स्वन क्षत्रं तस्माणा पीठ
विधाय तत्र लिखितश्रीचक्रोपरि रात्रौ श्मशाने शाल्मलीपुष्पैः सिद्धद्रव्यैश्च मासमात्रं पूजयतः राम०